# Mundaka Upanishad

# મુણ્ડકોપનિષત્

## Document Information

Text title : muNDakopaniShat

File name : mundaka.itx

Category : upanishhat, svara

Location : doc_upanishhat

Author : Vedic Rishis

Transliterated by : Kim Paulsen

Proofread by : Avinash Sathaye, P.P.Narayanaswami. John Manetta, NA

Description-comments : 5/108; Atharva Veda, Mukhya upanishad

Latest update : July 20,1999, November 5, 2022

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

November 5, 2022

*sanskritdocuments.org*

# મુણ્ડકોપનિષત્

॥ શ્રીઃ ॥

॥ મુણ્ડકોપનિષત્ ॥

ૐ ભદ્રં કર્ણેભિઃ શૃણુયામ દેવા ભદ્રં પશ્યેમાક્ષભિર્યજત્રાઃ ।
સ્થિરૈરઙ્ગૈસ્તુષ્ટુવાँ સસ્તનૂભિર્વ્યશેમ દેવહિતં યદાયુઃ ॥

સ્વસ્તિ ન ઇન્દ્રો વૃદ્ધશ્રવાઃ સ્વસ્તિ નઃ પૂષા વિશ્વવેદાઃ ।
સ્વસ્તિ નસ્તાર્ક્ષ્યો અરિષ્ટનેમિઃ સ્વસ્તિ નો બૃહસ્પતિર્દધાતુ ॥

॥ ૐ શાન્તિઃ શાન્તિઃ શાન્તિઃ ॥

॥ ૐ બ્રહ્મણે નમઃ ॥

## ૧

॥ પ્રથમમુણ્ડકે પ્રથમઃ ખણ્ડઃ ॥

ૐ બ્રહ્મા દેવાનાં પ્રથમઃ સંબભૂવ વિશ્વસ્ય કર્તા
ભુવનસ્ય ગોપ્તા । સ બ્રહ્મવિદ્યાં સર્વવિદ્યાપ્રતિષ્ઠામથર્વાય
જ્યેષ્ઠપુત્રાય પ્રાહ ॥ ૧॥

અથર્વણે યાં પ્રવદેત બ્રહ્માઽથર્વા તં
પુરોવાચાઙ્ગિરે બ્રહ્મવિદ્યામ્ ।
સ ભારદ્વાજાય સત્યવાહાય પ્રાહ
ભારદ્વાજોઽઙ્ગિરસે પરાવરામ્ ॥ ૨॥

શૌનકો હ વૈ મહાશાલોઽઙ્ગિરસં વિધિવદુપસન્નઃ પપ્રચ્છ ।
કસ્મિન્નુ ભગવો વિજ્ઞાતે સર્વમિદં વિજ્ઞાતં ભવતીતિ ॥ ૩॥

તસ્મૈ સ હોવાચ ।
દ્વે વિદ્યે વેદિતવ્યે ઇતિ હ સ્મ

યદ્બ્રહ્મવિદો વદન્તિ પરા ચૈવાપરા ચ ॥ ૪॥

તત્રાપરા ઋગ્વેદો યજુર્વેદઃ સામવેદોઽથર્વવેદઃ
શિક્ષા કલ્પો વ્યાકરણં નિરુક્તં છન્દો જ્યોતિષમિતિ ।
અથ પરા યયા તદક્ષરમધિગમ્યતે ॥ ૫॥

યત્તદદ્રેશ્યમગ્રાહ્યમગોત્રમવર્ણ-
મચક્ષુઃશ્રોત્રં તદપાણિપાદમ્ ।
નિત્યં વિભું સર્વગતં સુસૂક્ષ્મં
તદવ્યયં યદ્ભૂતયોનિં પરિપશ્યન્તિ ધીરાઃ ॥ ૬॥

યથોર્ણનાભિઃ સૃજતે ગૃહ્ણતે ચ
યથા પૃથિવ્યામોષધયઃ સંભવન્તિ ।
યથા સતઃ પુરુષાત્કેશલોમાનિ
તથાઽક્ષરાત્સંભવતીહ વિશ્વમ્ ॥ ૭॥

તપસા ચીયતે બ્રહ્મ તતોઽન્નમભિજાયતે ।
અન્નાત્પ્રાણો મનઃ સત્યં લોકાઃ કર્મસુ ચામૃતમ્ ॥ ૮॥

યઃ સર્વજ્ઞઃ સર્વવિદ્યસ્ય જ્ઞાનમયં તપઃ ।
તસ્માદેતદ્બ્રહ્મ નામ રૂપમન્નં ચ જાયતે ॥ ૯॥

॥ ઇતિ મુણ્ડકોપનિષદિ પ્રથમમુણ્ડકે પ્રથમઃ ખણ્ડઃ ॥

॥ પ્રથમમુણ્ડકે દ્વિતીયઃ ખણ્ડઃ ॥

તદેતત્સત્યં મન્ત્રેષુ કર્માણિ કવયો
યાન્યપશ્યંસ્તાનિ ત્રેતાયાં બહુધા સંતતાનિ ।
તાન્યાચરથ નિયતં સત્યકામા એષ વઃ
પન્થાઃ સુકૃતસ્ય લોકે ॥ ૧॥

યદા લેલાયતે હ્યર્ચિઃ સમિદ્ધે હવ્યવાહને ।
તદાઽઽજ્યભાગાવન્તરેણાઽઽહુતીઃ પ્રતિપાદયેત્ ॥ ૨॥ (પ્રતિપાદયેચ્છ્રદ્ધયા હુતમ્)

યસ્યાગ્નિહોત્રમદર્શમપૌર્ણમાસ-
મચાતુર્માસ્યમનાગ્રયણમતિથિવર્જિતં ચ ।
અહુતમવૈશ્વદેવમવિધિના હુત-
માસપ્તમાંસ્તસ્ય લોકાન્ હિનસ્તિ ॥ ૩॥

કાલી કરાલી ચ મનોજવા ચ
    સુલોહિતા યા ચ સુધૂમ્રવર્ણા ।
સ્ફુલિઙ્ગિની વિશ્વરુચી ચ દેવી
    લેલાયમાના ઇતિ સપ્ત જિહ્વાઃ ॥ ૪॥

એતેષુ યશ્ચરતે ભ્રાજમાનેષુ યથાકાલં
    ચાહુતયો હ્યાદદાયન્ ।
તં નયન્ત્યેતાઃ સૂર્યસ્ય રશ્મયો યત્ર (તન્નયન્ત્યેતાઃ)
    દેવાનાં પતિરેકોऽધિવાસઃ ॥ ૫॥

એહ્યેહીતિ તમાહુતયઃ સુવર્ચસઃ
    સૂર્યસ્ય રશ્મિભિર્યજમાનં વહન્તિ ।
પ્રિયાં વાચમભિવદન્ત્યોऽર્ચયન્ત્ય
    એષ વઃ પુણ્યઃ સુકૃતો બ્રહ્મલોકઃ ॥ ૬॥

પ્લવા હ્યેતે અદૃઢા યજ્ઞરૂપા
    અષ્ટાદશોક્તમવરં યેષુ કર્મ ।
એતચ્છ્રેયો યેऽભિનન્દન્તિ મૂઢા
    જરામૃત્યું તે પુનરેવાપિ યન્તિ ॥ ૭॥

અવિદ્યાયામન્તરે વર્તમાનાઃ
    સ્વયં ધીરાઃ પણ્ડિતંમન્યમાનાઃ ।
જઙ્ઘન્યમાનાઃ પરિયન્તિ મૂઢા
    અન્ધેનૈવ નીયમાના યથાન્ધાઃ ॥ ૮॥

અવિદ્યાયાં બહુધા વર્તમાના વયં
    કૃતાર્થા ઇત્યભિમન્યન્તિ બાલાઃ ।
યત્કર્મિણો ન પ્રવેદયન્તિ રાગા-
    ત્તેનાતુરાઃ ક્ષીણલોકાશ્ચ્યવન્તે ॥ ૯॥

ઇષ્ટાપૂર્તં મન્યમાના વરિષ્ઠં
    નાન્યચ્છ્રેયો વેદયન્તે પ્રમૂઢાઃ ।
નાકસ્ય પૃષ્ઠે તે સુકૃતેऽનુભૂત્વેમં
    લોકં હીનતરં વા વિશન્તિ ॥ ૧૦॥

તપઃશ્રદ્ધે યે હ્યુપવસન્ત્યરણ્યે
    શાન્તા વિદ્વાંસો ભૈક્ષ્યચર્યાં ચરન્તઃ ।

સૂર્યદ્વારેણ તે વિરજાઃ પ્રયાન્તિ
    યત્રામૃતઃ સ પુરુષો હ્યવ્યયાત્મા ॥ ૧૧॥

પરીક્ષ્ય લોકાન્ કર્મચિતાન્ બ્રાહ્મણો
    નિર્વેદમાયાન્નાસ્ત્યકૃતઃ કૃતેન ।
તદ્વિજ્ઞાનાર્થં સ ગુરુમેવાભિગચ્છેત્
    સમિત્પાણિઃ શ્રોત્રિયં બ્રહ્મનિષ્ઠમ્ ॥ ૧૨॥

તસ્મૈ સ વિદ્વાનુપસન્નાય સમ્યક્
    પ્રશાન્તચિત્તાય શમાન્વિતાય ।
યેનાક્ષરં પુરુષં વેદ સત્યં પ્રોવાચ
    તાં તત્ત્વતો બ્રહ્મવિદ્યામ્ ॥ ૧૩॥

॥ ઇતિ મુણ્ડકોપનિષદિ પ્રથમમુણ્ડકે દ્વિતીયઃ ખણ્ડઃ ॥

## ૨

॥ દ્વિતીય મુણ્ડકે પ્રથમઃ ખણ્ડઃ ॥

તદેતત્સત્યં
યથા સુદીપ્તાત્પાવકાદ્વિસ્ફુલિઙ્ગાઃ
    સહસ્રશઃ પ્રભવન્તે સરૂપાઃ ।
તથાઽક્ષરાદ્વિવિધાઃ સોમ્ય ભાવાઃ
    પ્રજાયન્તે તત્ર ચૈવાપિયન્તિ ॥ ૧॥

દિવ્યો હ્યમૂર્તઃ પુરુષઃ સબાહ્યાભ્યન્તરો હ્યજઃ ।
અપ્રાણો હ્યમનાઃ શુભ્રો હ્યક્ષરાત્પરતઃ પરઃ ॥ ૨॥

એતસ્માજ્જાયતે પ્રાણો મનઃ સર્વેન્દ્રિયાણિ ચ ।
ખં વાયુર્જ્યોતિરાપઃ પૃથિવી વિશ્વસ્ય ધારિણી ॥ ૩॥

અગ્નિર્મૂર્ધા ચક્ષુષી ચન્દ્રસૂર્યૌ
    દિશઃ શ્રોત્રે વાગ્વિવૃતાશ્ચ વેદાઃ ।
વાયુઃ પ્રાણો હૃદયં વિશ્વમસ્ય પદ્ભ્યાં
    પૃથિવી હ્યેષ સર્વભૂતાન્તરાત્મા ॥ ૪॥

તસ્માદગ્નિઃ સમિધો યસ્ય સૂર્યઃ

સોમાત્પર્જન્ય ઓષધયઃ પૃથિવ્યામ્ ।
પુમાન્ રેતઃ સિઞ્ચતિ યોષિતાયાં
બહ્વીઃ પ્રજાઃ પુરુષાત્સંપ્રસૂતાઃ ॥ ૫॥

તસ્માદૃચઃ સામ યજૂꣳષિ દીક્ષા
યજ્ઞાશ્ચ સર્વે ક્રતવો દક્ષિણાશ્ચ ।
સંવત્સરશ્ચ યજમાનશ્ચ લોકાઃ
સોમો યત્ર પવતે યત્ર સૂર્યઃ ॥ ૬॥

તસ્માચ્ચ દેવા બહુધા સંપ્રસૂતાઃ
સાધ્યા મનુષ્યાઃ પશવો વયાꣳસિ ।
પ્રાણાપાનૌ વ્રીહિયવૌ તપશ્ચ
શ્રદ્ધા સત્યં બ્રહ્મચર્યં વિધિશ્ચ ॥ ૭॥

સપ્ત પ્રાણાઃ પ્રભવન્તિ તસ્મા-
ત્સપ્તાર્ચિષઃ સમિધઃ સપ્ત હોમાઃ ।
સપ્ત ઇમે લોકા યેષુ ચરન્તિ પ્રાણા
ગુહાશયા નિહિતાઃ સપ્ત સપ્ત ॥ ૮॥

અતઃ સમુદ્રા ગિરયશ્ચ સર્વેઽસ્મા-
ત્સ્યન્દન્તે સિન્ધવઃ સર્વરૂપાઃ ।
અતશ્ચ સર્વા ઓષધયો રસશ્ચ
યેનૈષ ભૂતૈસ્તિષ્ઠતે હ્યન્તરાત્મા ॥ ૯॥

પુરુષ એવેદં વિશ્વં કર્મ તપો બ્રહ્મ પરામૃતમ્ ।
એતદ્યો વેદ નિહિતં ગુહાયાં
સોઽવિદ્યાગ્રન્થિં વિકિરતીહ સોમ્ય ॥ ૧૦॥

॥ ઇતિ મુણ્ડકોપનિષદિ દ્વિતીયમુણ્ડકે પ્રથમઃ ખણ્ડઃ ॥

॥ દ્વિતીય મુણ્ડકે દ્વિતીયઃ ખણ્ડઃ ॥

આવિઃ સંનિહિતં ગુહાચરં નામ
મહત્પદમત્રૈતત્સમર્પિતમ્ ।
એજત્પ્રાણન્નિમિષચ્ચ યદેતજ્જાનથ
સદસદ્વરેણ્યં પરં વિજ્ઞાનાદ્યદ્વરિષ્ઠં પ્રજાનામ્ ॥ ૧॥

યદર્ચિમદ્યદણુભ્યોઽણુ ચ

યસ્મિઁલ્લોકા નિહિતા લોકિનશ્ચ ।
તદેતદક્ષરં બ્રહ્મ સ પ્રાણસ્તદુ વાઙ્મનઃ
તદેતત્સત્યં તદમૃતં તદ્વેદ્ધવ્યં સોમ્ય વિદ્ધિ ॥ ૨॥

ધનુર્ગૃહીત્વૌપનિષદં મહાસ્ત્રં
શરં હ્યુપાસાનિશિતં સંધયીત । (સંદધીત)
આયમ્ય તદ્ભાવગતેન ચેતસા
લક્ષ્યં તદેવાક્ષરં સોમ્ય વિદ્ધિ ॥ ૩॥

પ્રણવો ધનુઃ શરો હ્યાત્મા બ્રહ્મ તલ્લક્ષ્યમુચ્યતે ।
અપ્રમત્તેન વેદ્ધવ્યં શરવત્તન્મયો ભવેત્ ॥ ૪॥

યસ્મિન્ દ્યૌઃ પૃથિવી ચાન્તરિક્ષમોતં
મનઃ સહ પ્રાણૈશ્ચ સર્વૈઃ ।
તમેવૈકં જાનથ આત્માનમન્યા વાચો
વિમુઞ્ચથામૃતસ્યૈષ સેતુઃ ॥ ૫॥

અરા ઇવ રથનાભૌ સંહતા યત્ર નાડ્યઃ ।
સ એષોઽન્તશ્ચરતે બહુધા જાયમાનઃ ।
ઓમિત્યેવં ધ્યાયથ આત્માનં સ્વસ્તિ વઃ
પારાય તમસઃ પરસ્તાત્ ॥ ૬॥ (પરાય)

યઃ સર્વજ્ઞઃ સર્વવિદ્યસ્યૈષ મહિમા ભુવિ ।
દિવ્યે બ્રહ્મપુરે હ્યેષ વ્યોમ્ન્યાત્મા પ્રતિષ્ઠિતઃ ॥ (સંપ્રતિષ્ઠિતઃ)

મનોમયઃ પ્રાણશરીરનેતા
પ્રતિષ્ઠિતોઽન્ને હૃદયં સંનિધાય ।
તદ્વિજ્ઞાનેન પરિપશ્યન્તિ ધીરા
આનન્દરૂપમમૃતં યદ્વિભાતિ ॥ ૭॥

ભિદ્યતે હૃદયગ્રન્થિશ્છિદ્યન્તે સર્વસંશયાઃ ।
ક્ષીયન્તે ચાસ્ય કર્માણિ તસ્મિન્દૃષ્ટે પરાવરે ॥ ૮॥

હિરણ્મયે પરે કોશે વિરજં બ્રહ્મ નિષ્કલમ્ ।
તચ્છુભ્રં જ્યોતિષાં જ્યોતિસ્તદ્યદાત્મવિદો વિદુઃ ॥ ૯॥

ન તત્ર સૂર્યો ભાતિ ન ચન્દ્રતારકં
નેમા વિદ્યુતો ભાન્તિ કુતોઽયમગ્નિઃ ।

તમેવ ભાન્તમનુભાતિ સર્વં
    તસ્ય ભાસા સર્વમિદં વિભાતિ ॥ ૧૦॥

બ્રહ્મૈવેદમમૃતં પુરસ્તાદ્બ્રહ્મ પશ્ચાદ્બ્રહ્મ દક્ષિણતશ્ચોત્તરેણ ।
અધશ્ચોર્ધ્વં ચ પ્રસૃતં બ્રહ્મૈવેદં વિશ્વમિદં વરિષ્ઠમ્ ॥ ૧૧॥

॥ ઇતિ મુણ્ડકોપનિષદિ દ્વિતીયમુણ્ડકે દ્વિતીયઃ ખણ્ડઃ ॥

## 3

॥ તૃતીય મુણ્ડકે પ્રથમઃ ખણ્ડઃ ॥

દ્વા સુપર્ણા સયુજા સખાયા સમાનં વૃક્ષં પરિષસ્વજાતે ।
તયોરન્યઃ  પિપ્પલં સ્વાદ્વત્ત્યનશ્નન્નન્યો અભિચાકશીતિ ॥ ૧॥

સમાને વૃક્ષે પુરુષો નિમગ્નો-
    ऽનીશયા શોચતિ મુહ્યમાનઃ ।
જુષ્ટં યદા પશ્યત્યન્યમીશ-
    મસ્ય મહિમાનમિતિ વીતશોકઃ ॥ ૨॥

યદા પશ્યઃ પશ્યતે રુક્મવર્ણં
    કર્તારમીશં પુરુષં બ્રહ્મયોનિમ્ ।
તદા વિદ્વાન્ પુણ્યપાપે વિધૂય
    નિરઞ્જનઃ પરમં સામ્યમુપૈતિ ॥ ૩॥

પ્રાણો હ્યેષ યઃ સર્વભૂતૈર્વિભાતિ
    વિજાનન્ વિદ્વાન્ ભવતે નાતિવાદી ।
આત્મક્રીડ આત્મરતિઃ ક્રિયાવા-
    નેષ બ્રહ્મવિદાં વરિષ્ઠઃ ॥ ૪॥

સત્યેન લભ્યસ્તપસા હ્યેષ આત્મા
    સમ્યગ્જ્ઞાનેન બ્રહ્મચર્યેણ નિત્યમ્ ।
અન્તઃશરીરે જ્યોતિર્મયો હિ શુભ્રો
    યં પશ્યન્તિ યતયઃ ક્ષીણદોષાઃ ॥ ૫॥

સત્યમેવ જયતે નાનૃતં (જયતિ)
    સત્યેન પન્થા વિતતો દેવયાનઃ ।

યેનાક્રમન્ત્યૃષયો હ્યાપ્તકામા
    યત્ર તત્સત્યસ્ય પરમં નિધાનમ્ ॥ ૬॥

બૃહચ્ચ તદ્દિવ્યમચિન્ત્યરૂપં
    સૂક્ષ્માચ્ચ તત્સૂક્ષ્મતરં વિભાતિ ।
દૂરાત્સુદૂરે તદિહાન્તિકે ચ
    પશ્યત્સ્વિહૈવ નિહિતં ગુહાયામ્ ॥ ૭॥

ન ચક્ષુષા ગૃહ્યતે નાપિ વાચા
    નાન્યૈર્દેવૈસ્તપસા કર્મણા વા ।
જ્ઞાનપ્રસાદેન વિશુદ્ધસત્ત્વ-
    સ્તતસ્તુ તં પશ્યતે નિષ્કલં ધ્યાયમાનઃ ॥ ૮॥

એષોઽણુરાત્મા ચેતસા વેદિતવ્યો
    યસ્મિન્પ્રાણઃ પઞ્ચધા સંવિવેશ ।
પ્રાણૈશ્ચિત્તં સર્વમોતં પ્રજાનાં
    યસ્મિન્વિશુદ્ધે વિભવત્યેષ આત્મા ॥ ૯॥

યં યં લોકં મનસા સંવિભાતિ
    વિશુદ્ધસત્ત્વઃ કામયતે યાંશ્ચ કામાન્ ।
તં તં લોકં જયતે તાંશ્ચ કામાં-
    સ્તસ્માદાત્મજ્ઞં હ્યર્ચયેદ્ભૂતિકામઃ ॥ ૧૦॥

॥ ઇતિ મુણ્ડકોપનિષદિ તૃતીયમુણ્ડકે પ્રથમઃ ખણ્ડઃ ॥

॥ તૃતીયમુણ્ડકે દ્વિતીયઃ ખણ્ડઃ ॥

સ વેદૈતત્પરમં બ્રહ્મ ધામ
    યત્ર વિશ્વં નિહિતં ભાતિ શુભ્રમ્ ।
ઉપાસતે પુરુષં યે હ્યકામાસ્તે
    શુક્રમેતદતિવર્તન્તિ ધીરાઃ ॥ ૧॥

કામાન્ યઃ કામયતે મન્યમાનઃ
    સ કામભિર્જાયતે તત્ર તત્ર ।
પર્યાપ્તકામસ્ય કૃતાત્મનસ્તુ
    ઇહૈવ સર્વે પ્રવિલીયન્તિ કામાઃ ॥ ૨॥

નાયમાત્મા પ્રવચનેન લભ્યો

ન મેધયા ન બહુના શ્રુતેન ।
યમેવૈષ વૃણુતે તેન લભ્ય-
સ્તસ્યૈષ આત્મા વિવૃણુતે તનૂં સ્વામ્ ॥ ૩॥ (આત્મા વૃણુતે)

નાયમાત્મા બલહીનેન લભ્યો
ન ચ પ્રમાદાત્તપસો વાપ્યલિઙ્ગાત્ ।
એતૈરુપાયૈર્યતતે યસ્તુ વિદ્વાં-
સ્તસ્યૈષ આત્મા વિશતે બ્રહ્મધામ ॥ ૪॥

સંપ્રાપ્યૈનમૃષયો જ્ઞાનતૃપ્તાઃ
કૃતાત્માનો વીતરાગાઃ પ્રશાન્તાઃ ।
તે સર્વગં સર્વતઃ પ્રાપ્ય ધીરા
યુક્તાત્માનઃ સર્વમેવાવિશન્તિ ॥ ૫॥

વેદાન્તવિજ્ઞાનસુનિશ્ચિતાર્થાઃ
સંન્યાસયોગાદ્યતયઃ શુદ્ધસત્ત્વાઃ ।
તે બ્રહ્મલોકેષુ પરાન્તકાલે
પરામૃતાઃ પરિમુચ્યન્તિ સર્વે ॥ ૬॥

ગતાઃ કલાઃ પઞ્ચદશ પ્રતિષ્ઠા
દેવાશ્ચ સર્વે પ્રતિદેવતાસુ ।
કર્માણિ વિજ્ઞાનમયશ્ચ આત્મા
પરેઽવ્યયે સર્વે એકીભવન્તિ ॥ ૭॥

યથા નદ્યઃ સ્યન્દમાનાઃ સમુદ્રે-
ઽસ્તં ગચ્છન્તિ નામરૂપે વિહાય ।
તથા વિદ્વાન્ નામરૂપાદ્વિમુક્તઃ
પરાત્પરં પુરુષમુપૈતિ દિવ્યમ્ ॥ ૮॥

સ યો હ વૈ તત્પરમં બ્રહ્મ વેદ
બ્રહ્મૈવ ભવતિ નાસ્યાબ્રહ્મવિત્કુલે ભવતિ ।
તરતિ શોકં તરતિ પાપ્માનં ગુહાગ્રન્થિભ્યો
વિમુક્તોઽમૃતો ભવતિ ॥ ૯॥

તદેતદૃચાઽભ્યુક્તમ્ ।
ક્રિયાવન્તઃ શ્રોત્રિયા બ્રહ્મનિષ્ઠાઃ
સ્વયં જુહ્વત એકર્ષિં શ્રદ્ધયન્તઃ ।

તેષામેવૈતાં બ્રહ્મવિદ્યાં વદેત
    શિરોવ્રતં વિધિવદ્યૈસ્તુ ચીર્ણમ્ ॥ ૧૦॥

તદેતત્સત્યમૃષિરઙ્ગિરાઃ
પુરોવાચ નૈતદચીર્ણવ્રતોઽધીતે ।
નમઃ પરમઋષિભ્યો નમઃ પરમઋષિભ્યઃ ॥ ૧૧॥

॥ ઇતિ મુણ્ડકોપનિષદિ તૃતીયમુણ્ડકે દ્વિતીયઃ ખણ્ડઃ ॥

ૐ ભદ્રં કર્ણેભિઃ શ‍ૃણુયામ દેવા ભદ્રં પશ્યેમાક્ષભિર્યજત્રાઃ ।
સ્થિરૈરઙ્ગૈસ્તુષ્ટુવાँ સસ્તનૂભિર્વ્યશેમ દેવહિતં યદાયુઃ ॥

સ્વસ્તિ ન ઇન્દ્રો વૃદ્ધશ્રવાઃ સ્વસ્તિ નઃ પૂષા વિશ્વવેદાઃ ।
સ્વસ્તિ નસ્તાર્ક્ષ્યો અરિષ્ટનેમિઃ સ્વસ્તિ નો બૃહસ્પતિર્દધાતુ ॥

॥ ૐ શાન્તિઃ શાન્તિઃ શાન્તિઃ ॥

॥ ઇત્યથર્વવેદીય મુણ્ડકોપનિષત્સમાપ્તા ॥

Encoded by Kim Paulsen

Proofread by Avinash Sathaye, P.P.Narayanaswami. John Manetta, NA

---

*Mundaka Upanishad*

pdf was typeset on November 5, 2022

Please send corrections to *sanskrit@cheerful.com*